# ॥ શ્રીકામાક્ષીસ્તોત્રમ્ ૩ ॥

.. Shri Kamakshi Stotram 3 ..

sanskritdocuments.org

May 21, 2017

# .. Shri Kamakshi Stotram 3 ..

# ॥ શ્રીકામાક્ષીસ્તોત્રમ્ ૩ ॥

## Sanskrit Document Information

Text title : shrIkAmAkShIstotram 3

File name : kAmAkShIstotram3.itx

Location : doc_devii

Author : Adi Shankaracharya

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : nature.and.poetry gmail.com

Proofread by : nature.and.poetry gmail.com

Latest update : April 24, 2015

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 21, 2017

*sanskritdocuments.org*

# ॥ શ્રી કામાક્ષીસ્તોત્રમ્ ૩ ॥

કલ્પાનોકહપુષ્પજાલવિલસન્નીલાલકાં માતૃકાં
કાન્તાં કઞ્જદલેક્ષણાં કલિમલપ્રધ્વંસિનીં કાલિકામ્ ।
કાઞ્ચીનૂપુરહારદામસુભગાં કાઞ્ચીપુરીનાયિકાં
કામાક્ષીં કરિકુમ્ભસન્નિભકુચાં વન્દે મહેશપ્રિયામ્ ॥ ૧॥

કાશાભાંશુકભાસુરાં પ્રવિલસત્કોશાતકીસન્નિભાં
ચન્દ્રાર્કાનલલોચનાં સુરુચિરાલઙ્કારભૂષોજ્જ્વલામ્ ।
બ્રહ્મશ્રીપતિવાસવાદિમુનિભિઃ સંસેવિતાઙ્ઘ્રિદ્વયાં
કામાક્ષીં ગજરાજમન્દગમનાં વન્દે મહેશપ્રિયામ્ ॥ ૨॥

ઐં ક્લીં સૌરિતિ યાં વદન્તિ મુનયસ્તત્ત્વાર્થરૂપાં પરાં
વાચાં આદિમકારણં હૃદિ સદા ધ્યાયન્તિ યાં યોગિનઃ ।
બાલાં ફાલવિલોચનાં નવજપાવર્ણાં સુષુમ્નાશ્રિતાં
કામાક્ષીં કલિતાવતંસસુભગાં વન્દે મહેશપ્રિયામ્ ॥ ૩॥

યત્પાદામ્બુજરેણુલેશં અનિશં લબ્ધ્વા વિધત્તે વિધિર્-
વિશ્વં તત્ પરિપાતિ વિષ્ણુરખિલં યસ્યાઃ પ્રસાદાચ્ચિરમ્ ।
રુદ્રઃ સંહરતિ ક્ષણાત્ તદ્ અખિલં યન્માયયા મોહિતઃ
કામાક્ષીં અતિચિત્રચારુચરિતાં વન્દે મહેશપ્રિયામ્ ॥ ૪॥

સૂક્ષ્માત્ સૂક્ષ્મતરાં સુલક્ષિતતનું ક્ષાન્તાક્ષરૈર્લક્ષિતાં
વીક્ષાશિક્ષિતરાક્ષસાં ત્રિભુવનક્ષેમઙ્કરીં અક્ષયામ્ ।
સાક્ષાલ્લક્ષણલક્ષિતાક્ષરમયીં દાક્ષાયણીં સક્ષિણીં var સાક્ષિણીં
કામાક્ષીં શુભલક્ષણૈઃ સુલલિતાં વન્દે મહેશપ્રિયામ્ ॥ ૫॥

ઓઙ્કારાઙ્ગણદીપિકાં ઉપનિષત્પ્રાસાદપારાવતીમ્
આમ્નાયામ્બુધિચન્દ્રિકાં અધતમઃપ્રધ્વંસહંસપ્રભામ્ ।
કાઞ્ચીપટ્ટણપઞ્જરાઽન્તરશુકીં કારુણ્યકલ્લોલિનીં
કામાક્ષીં શિવકામરાજમહિષીં વન્દે મહેશપ્રિયામ્ ॥ ૬॥

હ્રીઙ્કારાત્મકવર્ણમાત્રપઠનાદ્ ઐન્દ્રીં શ્રિયં તન્વતીં
ચિન્માત્રાં ભુવનેશ્વરીં અનુદિનં ભિક્ષાપ્રદાનક્ષમામ્ ।
વિશ્વાઘૌઘનિવારિણીં વિમલિનીં વિશ્વમ્ભરાં માતૃકાં
કામાક્ષીં પરિપૂર્ણચન્દ્રવદનાં વન્દે મહેશપ્રિયામ્ ॥ ૭॥

વાગ્દેવીતિ ચ યાં વદન્તિ મુનયઃ ક્ષીરાબ્ધિકન્યેતિ ચ
ક્ષોણીભૃત્તનયેતિ ચ શ્રુતિગિરો યાં આમનન્તિ સ્ફુટમ્ ।
એકાનેકફલપ્રદાં બહુવિધાઽઽકારાસ્તનૂસ્તન્વતીં
કામાક્ષીં સકલાર્તિભઞ્જનપરાં વન્દે મહેશપ્રિયામ્ ॥ ૮॥

માયામાદિમ્કારણં ત્રિજગતાં આરાધિતાઙ્ઘ્રિદ્વયામ્
આનન્દામૃતવારિરાશિનિલયાં વિદ્યાં વિપશ્ચિદ્ધિયામ્ ।
માયામાનુષરૂપિણીં મણિલસન્મધ્યાં મહામાતૃકાં
કામાક્ષીં કરિરાજમન્દગમનાં વન્દે મહેશપ્રિયામ્ ॥ ૯॥

કાન્તા કામદુધા કરીન્દ્રગમના કામારિવામાઙ્ગગા var કામદુહા
કલ્યાણી કલિતાવતારસુભગા કસ્તૂરિકાચર્ચિતા
કમ્પાતીરરસાલમૂલનિલયા કારુણ્યકલ્લોલિની
કલ્યાણાનિ કરોતુ મે ભગવતી કાઞ્ચીપુરીદેવતા ॥ ૧૦॥

ઇતિ શ્રીમદ્ આદિશઙ્કરાચર્યવિરચિતં શ્રી કામાક્ષીસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by greenmesg.org nature.and.poetry gmail.com

.. Shri Kamakshi Stotram 3 ..
was typeset using XƎLaTeX 0.99996
on May 21, 2017

Please send corrections to *sanskrit@cheerful.com*